श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीगुरुपवनपुराधीशाय श्रीकृष्णाय परब्रह्मणे नमः

श्री मेल्पत्तूर् नारायणभट्टतिरेः कृतिषु

# ॥ श्रीमन्नारायणीये सप्तदशं दशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणीये सप्तदशं दशकम् ॥

## ध्रुवचरितवर्णनम्

उत्तानपादनृपतेर्मनुनन्दनस्य
    जाया बभूव सुरुचिर्नितरामभीष्टा।
अन्या सुनीतिरिति भर्तुरनादृता सा
    त्वामेव नित्यमगतिः शरणं गताऽभूत् ॥ **17.1** ॥

अङ्के पितुस्सुरुचिपुत्रकमुत्तमं तं
    दृष्ट्वा ध्रुवः किल सुनीतिसुतोऽधिरोक्ष्यन्।
आचिक्षिपे किल शिशुः सुतरां सुरुच्या
    दुस्सन्त्यजा खलु भवद्विमुखैरसूया ॥ **17.2** ॥

त्वन्मोहिते पितरि पश्यति दारवश्ये
    दूरं दुरुक्तिनिहतः स गतो निजाम्बाम्।
साऽपि स्वकर्मगतिसन्तरणाय पुंसां
    त्वत्पादमेव शरणं शिशवे शशंस ॥ **17.3** ॥

आकर्ण्य सोऽपि भवदर्चननिश्चितात्मा
    मानी निरेत्य नगरात् किल पञ्चवर्षः।
सन्दृष्टनारदनिवेदितमन्त्रमार्गः
    त्वामारराध तपसा मधुकाननान्ते ॥ **17.4** ॥

ताते विषण्णहृदये नगरीं गतेन
    श्रीनारदेन परिसान्त्वितचित्तवृत्तौ।

बालस्त्वदर्पितमनाः क्रमवर्धितेन
    निन्ये कठोरतपसा किल पञ्चमासान्॥ **17.5**॥

तावत्तपोबलनिरुच्छ्वसिते दिगन्ते
    देवार्थितस्त्वमुदयत्करुणार्द्रचेताः।
त्वद्रूपचिद्रसनिलीनमतेः पुरस्ता -
    दाविर्बभूविथ विभो गरुडाधिरूढः॥ **17.6**॥

त्वद्दर्शनप्रमदभारतरङ्गितं तं
    दृग्भ्यां निमग्नमिव रूपरसायने ते।
तुष्टूषमाणमवगम्य कपोलदेशे
    संस्पृष्टवानसि दरेण तथाऽऽदरेण॥ **17.7**॥

तावद्विबोधविमलं प्रणुवन्तमेन -
    माभाषथास्त्वमवगम्य तदीयभावम्।
राज्यं चिरं समनुभूय भजस्व भूयः
    सर्वोत्तरं ध्रुव पदं विनिवृत्तिहीनम्॥ **17.8**॥

इत्यूचिषि त्वयि गते नृपनन्दनोऽसा -
    वानन्दिताखिलजनो नगरीमुपेतः।
रेमे चिरं भवदनुग्रहपूर्णकामः
    ताते गते च वनमादृतराज्यभारः॥ **17.9**॥

यक्षेण देव निहते पुनरुत्तमेऽस्मिन्
    यक्षैः स युद्धनिरतो विरतो मनूक्त्या।
शान्त्या प्रसन्नहृदयाद्धनदादुपेतात्
    त्वद्भक्तिमेव सुदृढामवृणोन्महात्मा॥ **17.10**॥

अन्ते भवत्पुरुषनीतविमानयातो
    मात्रा समं ध्रुवपदे मुदितोऽयमास्ते।

एवं स्वभृत्यजनपालनलोलधीस्त्वं
वातालयाधिप निरुन्धि ममामयौघान् ॥ **17.11** ॥

॥ इति श्रीमन्नारायणीये सप्तदशं दशकं समाप्तम् ॥